Shri Raghunatha Temple MSS. Library,
JAMMU

No. ४०५ / घ

Title रसरत्नहार टीका लक्ष्मीविहारः

Author शिवराम त्रिपाठी

Extent १५ पत्र Age

Subject अलङ्कार शास्त्र

© Dharmartha Trust J&K. Digitized by eGangotri

रसरत्नाकरः दीकालदीपिका

र: ४०५

१२अमानी

© Dharmartha Trust J&K. Digitized by eGangotri

नं. ४०५६

[illegible]

लक्ष्मीविहारः

१२ पत्राणि

अशुद्ध [illegible]

[illegible]

[illegible]

© Dharmartha Trust J&K. Digitized by eGangotri

श्रीगणेशाय नमः॥ सीताकराब्जमृदुलालितपादपद्मस्तस्यामुरस्थजलजसुंदरमीक्षमाणः॥ रत्यन्वितस्य मदनस्य रुचिंदधानः श्रीमान्रघुप्रभव
वंशपतिर्विरेजे॥१॥ ग्रंथादौ कृतं मंगलं शिष्यशिक्षायै निबध्नाति निरीक्ष्येति विष्णोश्चरणारविंदनखेषु स्वीयं प्रतिबिंबं निरीक्ष्य दशावतारा
१ दपि अस्मात् विष्णोः स्वाधिकं मन्यमाना लक्ष्मीः विदुषां सुखाय॥ साकल्येन स्तात् भवतु विष्णोः पादसेवनं कुर्वाणा लक्ष्मीः पादनखेषु
दशसु स्वीयं प्रतिबिंबं ईक्षमाणा एकादशीमात्मानं ज्ञात्वा विष्णोरधिकं मन्यमानेति भावः स्त्रीस्वभावादित्यन्ये बुधाः समुत्पन्नानसाम्यपर्मतं

निरीक्ष्य विष्णोश्चरणारविंदनखेषु लक्ष्मीः प्रतिबिंबमस्मात्॥ दशावतारादपि मन्यमाना स्वाधिका
मास्ताद्विदुषां सुखाय १ उद्ग्रथ्यते सर्वविचक्षणानां प्रीत्यै मया यं रसरत्नहारः॥ गुरोः कृपेतोखिल
लब्धवर्णाकंठस्थितः स्याद्विदितो दिगंते २॥

यद्वा। भगवतात्तिर्यगादियोनिषु जन्मबिडंबयता दशावतारा संपादिताः मयातु वक्षस्थलस्थितयैव स्वरूपादप्रच्युतया चेति स्वाधिकं मन्यमाने
तिभावः॥१॥ अदेति सर्वविचक्षणानां प्रीत्यै मया यं रसरत्नहारः उद्ग्रथ्यते गुरोः कृपेतः अखिललब्धवर्णाकंठस्थितो दिगंते प्रथितः स्यात् गौ
रीरत्नेकारः आशीरनोमाभिलषिते वस्तुन्याशंसनं यथेति दर्शी॥२॥ छ॥ छ ॥ छ ॥ छ छछ छछ ॥छ राम॥ छ॥॥

© Dharmartha Trust J&K. Digitized by eGangotri

स्यादिति स्थायिभावः स्थायी चासौ भावश्च भावो विकारश्चित्ते स्यान्निर्विकल्पेय आद्य इति भ्रमरसिंहोपि विकारो मानसो भाव इति विभावैरनु
भावैर्व्यभिचारिभिर्यथायोग्यं सात्त्विकैश्च संयुतैः क्रमशः प्रकर्षमारोप्यमाणः रसः स्यात् तथा च भरतसूत्रं विभावानुभावव्यभिचारिसंयोगाद्रसनि
ष्पत्तिरिति विभावैश्च सात्त्विकैर्व्यभिचारिभिः आनीयमानः स्वादुत्वं स्थायी भावो रस उच्यते वक्ष्यमाणस्वभावैर्विभावानुभावव्यभिचारिसात्त्वि
कैः काव्योपात्तैरभिनयोपादर्शितैर्वा श्रोतृप्रेक्षकाणामंतर्विपरिवर्तमानो रत्यादिर्वक्ष्यमाणलक्षणः स्थायी स्वादगोचरतां नीयनीयमानो र
सः तेन रसिकाः सामाजिकाः काव्ये तु तथाविधानंदसंविदुन्मीलनहेतुभावेन रसवत् आयुर्घृत मित्यादिव्यपदेशवत् स्थायिलक्षणं दशरूपके

स्यात् स्थायिभावोत्र रसो विभावैस्तथानुभावैर्व्यभिचारिभिश्च आरोप्यमाणः क्रमशः प्रकर्षं यथोचितैः सात्त्विकसंयुतैश्च ३ आ
स लंबनोद्दीपनभिद्धि भावो रसस्य हेतुः कथितः सुधीभिः ॥ रसो यमालंब्य भवेत्स हि तत्त आलंबनाख्यः स भवेद्धि भावः ४॥ तटस्थ उद्दी
पयते रसं य उद्दीपनाख्यः स भवेद्धि भावः रसस्य कार्यं ह्यनुभावसंज्ञं तेथाः सहाया व्यभिचारिणोत्र ॥५॥ ॥ ॥ ॥ ॥

विरुद्धैरविरुद्धैर्वा भावैर्विच्छिद्यते न यः आत्मभावं नयत्यन्यान्स स्थायी लवणाकरः यदुक्तं विरुद्धा अविरुद्धा वा यं तिरोधातुमक्षमाः आनंदांकुरकंदोसौ
भावः स्थायिपदास्पदं। ४ तटेति। अनुभावो विकारस्तु भावसंसूचनात्मकः स्थायिभावननुभावयंतः सामाजिकान्भ्रूक्षेपकटाक्षादयो रसपोषकारी ५
णोनुभावाः व्यभिचारिणः विशेषेणाभिमुख्येन चरंतो व्यभिचारिणः स्थायिन्युन्मग्ननिर्मग्नाः कल्लोला इव वारिधौ यथा वारिधौ सत्येव कल्लोला
उद्भवन्ति विलीयन्ते च तद्वदेव रत्यादौ स्थायिनि सत्येव आविर्भावतिरोभावाभ्यामाभिमुख्येन चरंतो वर्तमाना निर्वेदादयो व्यभिचारिणो भावा इति रू

© Dharmartha Trust J&K. Digitized by eGangotri

[illegible]

शृंगारेति न मुनवरसाः रसानुपपन्नं शृंगारस्य लोके आस्वाद्यतायाः सर्वानुभवसिद्धत्वात् काव्ये गुणालंकारयोगे नास्वादगोचरतया रसत्वं युक्तं नेतरेषा
मिति चेत् केषांचित्तु एतदेव तद्भिन्नमतेनेयं संख्योक्तिः नन्वेवमपि नवरसा इत्यनुपपन्नं भक्तिवात्सल्यश्रद्धारूपैस्त्रिभिः सह द्वादशसंख्यत्वात् नत्र भ
क्तिर्भगवति प्रसिद्धा श्रद्धाप्यास्तिक्यनिश्चयात्मिका वेदशास्त्रार्थविषया शिष्टानां प्रसिद्धैव वात्सल्यं पुत्रादौ स्नेहाभिधानमिति चेन्न भक्तिवात्सल्ययोर्भावान्त
र्भावात् श्रद्धायाश्च सुरतात्मकत्वात् चमत्कारानुत्पादान्न रसत्वमिति नवत्वोक्तिर्न विरुद्धा दशरूपके प्रीतिभक्त्यादयो भावा मृगयाक्षादयो रसाः हर्षोत्साहा
दिषु स्पष्टमन्तर्भावान्न कीर्तिता इति नन्वेवमपि नवरसत्वं विरुद्धं नास्त्येव शान्तो रसः आचार्येण विभावाद्यप्रतिपादनात् अन्ये तु अनादिकालप्रवाहा

शृंगारवीरकरुणाद्भुतहास्यभयानकाः रौद्रबीभत्सशान्ताख्याः काव्ये नव रसाः स्मृताः ६ स्त्रीपुंसयोर्मिथो रागः शृं
गार उच्यते संभोगो विप्रलंभश्चेत्येष स्याद्द्विविधो द्वयोः ७ संयुक्तयोः स्यात्संभोगो विप्रलंभो वियुक्तयोः प्रच्छन्नश्च प्र
काशश्च पुनरेष द्विधा स्मृतः ॥८॥ यात रागद्वेषयोरुच्छेत्तुमशक्यत्वात् अन्ये तु वीरबीभत्सादावन्तर्भावं वर्णयन्ति अमरसिंहोपि शृंगारवीरक
रुणाद्भुतहास्यभयानकाः बीभत्सरौद्रे च रसा इति चेत्सत्यं मतान्तरीत्या नवसंख्येति बोध्यं निर्वेदस्थायिभावोस्ति शान्तोपि नवमो रस इति काव्यप्रकाश
सम्प्रदायज्ञानसमुत्थानः शान्तो निःस्पृहनायक इति चेत्सत्यं मतान्तरे वाग्भट्टालंकारे ६ स्त्रीपुंसयोरिति उक्तं च अनुकूलौ निषेवेते यत्रान्योन्यं विलासि
नौ दर्शनस्पर्शनादीनि स संभोगो मुदान्वितो भावो यदा रतिर्नाम प्रकर्षमुपगच्छति नाधिगच्छति चाभीष्टं विप्रलंभनिषेवेते यत्रान्योन्यं विलासि
नौ दर्शनस्पर्शनादीनि स्त रोच्यते मनोनुकूलेष्वर्थेषु सुखसंवेदनं रतिलक्षणं ७ सीयेनायिकादिवर्णनप्रकारो रसमंजरीव्यवहाराभानुकृत तस्त्रि
या एव नहि केवलमालंबनेन रसस्य व्यवहारः विभावानुभावेत्यादिभरतसूत्रविरोधात् आलंबनविभावत्वेन तावन्नायिका निरूप्यन्त इति सोपि

© Dharmartha Trust J&K. Digitized by eGangotri

स्वहतौतु प्रमंदोषंपरिहरन्नाहस्त्रीपुंसविति ९ स्वकीयेति उदाहरणं अंतरास्यंहास्यमक्ष्णो: सतीनांप्रपदेगति: प्रीत्यंकुशेनिसप्रेपिषवारणावारणां
यत्तुरमंयोगनागतेसुदाहरणंतत्रापांगप्रेक्षणस्यपरकीयायाअपिधर्मत्वाचित्यं १०॥ नाखितिआद्यामुग्धा मुग्धानववय: क्रामारतोनामाम्रदु:कु
धीतिदशरूपके साद्विद्विधा अज्ञातयौवनाज्ञातयौवना आद्योदाहरणंदिनेदिनेदर्पणामीक्षमाणाकीर्तिमुखेरोरूपचीयमानां निरीक्ष्यनेत्रांबुजयो
विकाशंप्रेपच्छवालामुकुरेमवक्ति नीराजीरमुपागतेत्यत्र नेत्रस्यस्वत:स्वदर्शनमसंभवि तथाचवसुबंधु: गुणानामपिनिजरूपप्रतिपत्ति:परतएव

स्त्रीपुंसाविति निर्देशान्नायिका वर्ण्यते पुरा स्वीया च परकीया च सामान्येति त्रिधा स्त्रिय: ॥ ९ ॥ स्वकीयात्रोत्तमाचारा
गि पतिमात्रानुरागिणी ॥ मुग्धा मध्या प्रगल्भेति त्रिधा कुलितमोवना ॥ ज्ञाता स्वाद्या सा द्विधाऽज्ञातयौवना ज्ञातयौव
ना ॥ नवोढा सैव सुरतप्रतिरोधकलज्जया ॥ ११ ॥ स्याद्विश्रब्धनवोढा च मनाग्लब्धदाक्षमाघृत: ह्रीकामसाम्ये

संभवति स्वमहिमदर्शनमक्ष्णोर्मुकुरतलेजायतेयस्मात् अनत्त्दुदाहरणंचिंत्यं ज्ञातयौ ९ मध्यास्यारूढयैसागसिनायके ॥ १९ ॥
वनायथा वभूवकिंचित्नवनोवय — — — वयस्यैवमितिप्रलप्य नतानता ननेदु: क्षणमाजगौरदिग्न:
श्रियंपाशाधरस्यमुग्धा यत्तु रसमंजर्यां अंभोजलोचनेनत्र ज्ञायोवनत्वज्ञानार्थमर्थांतरं कल्पयंतिसानुकुकल्पनैवतत्यद्यस्यसखीकृतपरिहासरू
पत्वेनज्ञापकत्वान्तयौवनत्वाज्ञापकत्वात् नवोढायथापत्यासनाथममत्वंभवतिनिरीक्ष्यवालानुशाकसहसात्रपयानयातु यातोपिनापश्यं
गे शारदभ्रशुभ्रेविद्युल्लतेवकनकाभतनु:स्थिरतां ॥ ११ ॥ इति मध्योद्यद्यौवनानंगमेसंतसुरतक्षेमतिदशरूपके ॥ १२ ॥ ॥ ॥ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

प्रौढेति संप्राप्तनाहूरायकामोऽइतिरदशासूपके रतिप्रीतिर्यथा वक्रोणावक्रमरविंदशालनेत्रासंयोऽपकापित्तत्दयंतद्दयेन शेते कंठभुजेन दयितस्यतद्
रूयुग्ममुरूद्वयेन वर्चनंवच्चने:सहासं यत्तु रसमंजर्यां अवरायो नीलोत्पलं निकुंते इतितन्चिंत्यं भग्नकमलकुसुदयोर्विकाशादर्शनात् यौवनो
धस्मरोन्मत्ता प्रगल्भा दयितांगके विलीयमानेवानंदाद्रूतारंभेप्यचेतना यथा धन्यासि या कथयसि प्रियसंगमेपि विश्रब्धचाटुकशतानि रतांत
रेषु नीवीप्रतिप्रणिहिते तु करे प्रियेण सख्य: शपामि यदि किंचिदपि स्मरामि एता:ज्येष्ठाकनिष्ठेति द्विधेति ज्येष्ठाकनिष्ठेयथा दृष्ट्वैकासनसंगते प्रि

वक्रोक्तिस्तद्वैपरीत्ये भवेत्परुषवाक्यथा प्रौढाद्यधिककंदर्पा पत्यावखिलकेलिकृत् १३ एता ज्येष्ठाकनिष्ठेति द्विधा
ज्ये स्नेहैकभाजनं भर्तुर्यासामवैष्टाकनिष्ठातु ततोवरा। १४॥ धीराधीरा तथाधीराधीरेतित्रिविधेस्त्रियौ मध्याप्रग
ल्भिके मानावस्थायामुदिते बुधै: १५ धीराधीरक्रमाद्व्यंग्याव्यंग्यकोपप्रकाशिके धीराधीराक्रमाद्व्यंग्याव्यंग्य
कोपप्रकाशिका ॥१६॥

यतेमेयपश्चादुपेत्यादरादेकेकस्यानयनेनिमील्यविहितक्रीडानुबंधच्छल: ईषद्वक्रितकंधर: सपुलक: प्रेमोल्लसन्मा
ध्वसामंतर्हासलसत्कपोलफलं कांधूर्तोपरां चुंबति यत्तु रसमंजर्यां धैर्याधैर्येत्युदाहरणं तदसंभवि मुग्धायास्तदसंभवात् कोपमार्दवमितिमुग्धा
चेष्टोक्ते: पुरुषस्यानवयायनम्रवरनामित्यत्रस्य ष्टमेवमुग्धात्वप्रतीते: १६॥ ॥ ॥ ॥ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

[illegible]

र. मं. २३

प्रियमिति धीरासोल्लुंठवक्रोक्त्या मध्या सा तु हे नागसं खेदयेद्दयितं कोपादधीरा परुषाक्षरं हीविषाराभरभुग्नशिरा मां हंतु मेतिक्रमिति त्वषभरेष: सरम नाथ इति वंधनमाशु प्रापणीयइतरोत्र लगोष्टे प्रोढायाश्च छायथा॥ सावहित्यादरोदास्तेरतो धीरेत रा क्रुधा संतर्ज्यताडयेत्कांतं मध्याधीरे वतं वदेत् तर्जनताडनोदाहरणं यथा कोपात्कोमललोलवाहुलतिकापाशेन वध्वा दृढं नीत्वा वासनिकेतनं दयितया सायं सखीनां पुनः भूयोप्येवमिति स्खल कलगिरा संसूच्य दुश्चेष्टितं धन्योहन्यत एव निह्नुतिपर: प्रेयान्रुदंत्या हसन् यत्तु रसमंजर्यां प्रतिफलेति तदसंगतं देवविषयेतथा दर्शनस्य अयोग्य

त्वात् प्रियं सोल्लुंठवक्रोक्त्या मध्याधीरा दहेद्रुषा अधीरा परुषोक्त्याथ धीराधीरा तु रोदने:॥१७॥ प्रगल्भा यदि धीरा स्याच्छन्न
कोपाकृतिस्तदा उदास्ते सुरते तत्र दर्शयंत्यादरान्वहि:॥१८ धीराधीरा थ सोल्लुंठभाषितै: खेदयेदसौ तर्जयेत्ताडयेदन्ये
मुक्तं साहित्यदर्पणे धीरादिभेद: स्वीयायाइति प्राचीनलेखनं न ध्येस्तु परकीयाया अपि नेत्युरितीरितं॥२० स्वामू
स्वानुरक्ता स्त्री परकीया निगद्यते उत्तमा व भेदाभ्यां द्विविधा हि विधामता २१॥ अलक्षितानुरागेषा स्वीयाकल्पोत्तमा
भवेत्॥ तद्भिन्ना तवनौ यावि दग्धाद्यास्तु तद्भिदा :२२ परोढा कन्यका भेदाद्द्विविधैषा परांगना चेष्टैषा स्यान्न प्रसिद्धेत्
त्वात् सान्नूढेति स्वान्नूढेति स्वशब्देन वर्ण्य: यत्तु रसमंजर्यां अप्रकटेति तत्र कन्यकाया: पत्युरभावात्पर पुरुषा रागः कविभिस्तुत:॥२३॥
नुरागस्यासंभव: यदि भावि नं पतिमादाय परत्वं तर्हि तथैव परोढात्वमेवास्तु किं भेदद्वय वर्णनेन यद्यपि पित्राद्यधीनतया परकीयात्वमिति तद्विनत्वक्ष
णं वा कोत स्यानुपयोगात् अथ संज्ञायां परास्वियं परकीयेत्यत्रोपयोग इति चेत् तर्हि अप्रकटत्वाद्युनुपयुक्तं तद्भिदा इति भिद्भिदादिभ्योङ् परकीयायथा
रतिर्मुरारे: शिक्षसखीमानं निजनिर्मितं अनन्याजवशाद्दत्तीप्रियांप्रा दत्रीयद्र्सानृ अप्रकटानुरागा यथा दृष्टिं हे प्रतिवेशिनि क्षणमिहाप्यस्मद्

© Dharmartha Trust J&K. Digitized by eGangotri

रस.
४ क्रियाविदग्धा यथा श्वश्रूनिरुद्धोर्ध्वेग तिर्विदग्धाभिषेणानिक्षालितकेशहस्ता स्तनावधिस्वच्छनिवद्धवस्त्रागो रीजगामोर्ध्वमपश्यदिष्टं स्वहीनस्रे यया
तस्येति गत्यर्थाकर्मकेति भावे क्तः प्रियस्य यातं गमनं तस्य वोधात् यथा सावार्षिकोत्सवदिने सर्वसीहहाक्षीमात्रा प्रसाधनमिषेणागृहे निरुद्धा नद्याः स
मागतमवेक्ष्य गृहीतपद्मं कांतं द्रुतं मुरवमधन्तदिने द्रुतुल्यं पत्तुरसमंजर्याकर्णाकल्पितेतितिनच्चित्रं निष्पतन्नयनवारिधारया स्पष्टत्वात्परकीयात्वां सं
भवः नचसति स्वीयात्वे क्षितिः गुप्तादीनां परकीयायामेवांतर्भावोक्तेः गुप्ता यथा भूतसुरतगोपना यथा गृह्णल्यानिष्कुटे श्रीफलदलमसकृदक्ष

५ विदग्धा मुदिता चैवानुशयानालथक्षिता गुप्ता च कुलटा चेति षट्प्रकारोदिता बुधैः ॥२५॥ विदग्धा वाक्क्रियाहेतु ना
वैदग्ध्याभ्यां द्विधेष्यते भाविस्वाभीष्टवोधेन प्रहृष्टा मुदितोच्यते नाशांगसंकेतस्यलस्यभाविनोभावनांकथा स्वही यि ५
नप्रिययातस्यवोधत्र्यानुशयात्रिधा २६॥ लक्षितासातु वित्तेया याजने शातरागिका याणोपायतिसागुप्ताभूतभावि का

मूले प्रमंत्याप्रजायेशं करस्य श्रमजलमखिलेवर्षणि स्तंभ उर्वोः स्तुत्या कश्चिद्विलंवः क्षतमजनिकुचे कंटकेनैवतस्य तत्पूजास्त्रग्घराहं हृतसकल
जनैरन्यथैव यातर्कि वर्त्तमानसुरतगोपनायथा आरामभादिकरिणोच्चितदेवपूजाहेतोर्विचित्रकुसुमानयनाय यांत्या ऐत्वां तरिमहति भवैनवधा
नभाजो भ्रष्टां स्वेगदं मृगयते सखि साधुरेष अपि च धत्तरा प्रकथं भीमं वभंजाय समित्यज्ञो सौ मयाप्यक्षोदर्शी यति साधुः स वैधुरा गाविता भाविसुरतगो
पनायथा निंदंतु पापमथवा तनयः सखिमानवामा जानातु किं विदपि चेतसि वल्लभस्त्र गात्रं गतिश्रमभरालसमेतदस्तु यास्यामि किं न निजदैवतपूजनाय . राम.
पत्तुरसमंजर्यामित्यपीत्यादि नतत्र श्लोके हृतवर्तिष्यमाणयोरेव प्रतीतेर्निष्प्रियत्वम् ॥२७॥ ॥ ॥ ॥ ॥ ॥ ॥ ॐ॥ ॥ ४

© Dharmartha Trust J&K. Digitized by eGangotri

कुलटा यथा कांश्चिद्दृच्चोददति परूयति कांश्चनेयं कांश्चिच्च दर्शयति संवृत्तमात्मनोंगं कांश्चिद्दूते न च सुरवं नयते द्वितीयं नैकत्र हि मणयिता
कुलटाजनस्य लोभेनेति यथा आदर्शनादर्थहरां वेश्यामर्थविशेषकैः महाजना मांस्तु वतांसाद्दसंकौ न वर्णमेत् साधारणस्त्रीगणि
काकला प्रगल्भाधौर्त्ययुक् छन्नकामसुरवार्थाज्ञस्वतंत्राहंयुपंढकान् रक्तेवं रंजयेदेतान्निःस्वान्मात्रा विमाचयेत् छन्नकाम यते छन्न
कामाः श्रोत्रियवणिग्लिंगि प्रभृतयः सुरवार्थाः प्रयासा वा प्रधनः सुरवप्रयोजनो वा अज्ञोमूर्खः स्वतंत्रो निरंकुशः अहंयुरहंकृतः पं
ढारिएतान्बहुवित्तान्रक्तेव रंजयेत् अर्थार्थं तत्प्रधानतया तद्धनेर्गृहीतार्थान्कुट्टन्यानिष्कासयेत्। गर्वितेति तत्राद्या यथा रात्रौ

॥कुलटा वद्बुपुरागा वेश्या देश्याप्रकाशतः लोभेन सर्वपुंरागा सामान्या कथिता बुधैः २८ गर्विता चान्यसंभोगदुःखिता
॥मानिनी स्त्रियः॥ गर्विता द्विविधा रूप्तो प्रेमसौंदर्ययोर्भिदा॥२९॥ मानःकोपः स तु द्वेधा प्रणयेर्ष्यासमुद्भवः द्वयोः प्रणय १९
॥मानः स्यात्कोपोयः कारणं विना ३० पत्युरन्यप्रियासंगे दृष्टेप्यनुमिते श्रुते ईर्ष्यामानो भवेत्स्त्रीणां तत्र त्वनुमितिस्त्रिधा

प्रियावियोगस्य धन्यः कोस्ति सा सखि : मामपश्यन्क्षणमपि प्रियो यद्दुर्मनायते यत्तु रसमंजर्यां एताः षोडशापीति तत्प्रारख्यानं व्यंग्यार्थकौमुद्यां
मध्या प्रगल्भयोः धीरादिषड्भेदानां ज्येष्ठकनिष्ठाभ्यां द्वादशभेदाः मुग्धा एकैव एवं त्रयोदश द्विविधा परकीया एका सामान्या एवं षोडशेति तच्चिंत्यं
भानुक्तज्येष्ठाकनिष्ठालक्षणस्य मुग्धायामपि सत्वात् तस्या द्विधत्वात्तु मानइति यत्तु रसमंजर्यां प्रियापराधसूचिका चेष्टा मान इति तन्न वा
वाच्यस्तया मद्वचनात्स राजा वक्तो विशुद्धामपि यत्समक्षं मां लोकवादश्रवणादहासीच्छ्रुतस्य किं तत्सदृशं कुलस्येत्यत्र दोषात् नहि तत्र सीता
यामानः चेष्टा तु न केवलं शारीरव्यापारः किं तु गिरपि मानोन्यवनितासंगादीर्ष्याविकृतरुच्यत इति भानुभद्दालंकारे॥३१॥ ॥ ॥ ॥॥

© Dharmartha Trust J&K. Digitized by eGangotri

५

रसांतरं यथा ॥ समुत्क्षिप्तं पत्न्या हस्थितवीभत्ता वरं वरप्रदानस्य च कारभ्रलिनः त्रसनु पाशादिसु तासु संभ्रमस्वयं प्रहाश्लेषसुखेन निघ्नय स्वाधीनपति
कादयइति आसन्नायत्तमरणात्स्पष्टास्वाधीनभर्तृका मुदा वासकसज्जास्वं मंडयत्येष्यति प्रिये । चिरयत्यव्यलीके तु विरहोत्कंठितामता उक्तेति
शेषः ज्ञातेन्यासंगविकृते खंडितेर्ष्यासमाकुला कलहांतरिता मर्षाद्धिधूतानुनयात्तियुक् विप्रलब्धोक्तसमये मप्राप्तेतिविमानिता दूरदे
शांतरस्थे तु कार्यतः प्रोषितप्रिया। कामार्त्ताभिसरेत्कांतं सारयेद्वाभिसारिकाइति रसार्णवे स्वाधीनपतिका यथा द्विविधेयोमया मानः
सविधेयोस्ति मे यतः सविधे वर्तते तस्य च सविधेमेप्यनुग्रहः वासकसज्जा यथा अनल्पं तल्पमाकल्प्य चेति कां वीटिकां स्रजं निवेश्यत
तस्य प्रायितैभोगांकगोत्रस्खलनतो भवेत् साम भेदोथ दानं च नत्युपेक्षे रसांतरं ३३॥ तद्भंगाय पतिः कुर्यात्षडुपायानि
मान्कमात्। तत्र प्रियवचः साम भेदः सख्युपरंजनं ३३॥ दानं व्याजेन भूषादेः पादयोः पतनं नतिः सामादौ तु परिक्षीणे
स्यादुपेक्षावधीरणं रभसत्रासहर्षादेः कोपभ्रंशो रसांतरं इति मानविचारस्तुक्तः साहित्यदर्पणे ३५ मानो लघुर्मध्यमश्च गु
रुश्च त्रिविधो भवेत्। असाध्यस्तु रसाभासः इति भानुकृतो स्थितं अपरस्त्रीदर्शनोत्थो गोत्रस्खलनजस्तथा अन्यस्त्रीसंगज
नितः क्रमेण त्रिविधो भवेत् ॥३७॥ विशेषाना नायिकानां स्युः स्वाधीनपतिकादयः अन्यत्र पूर्वापर्यो कोहेतुरूपो मनीषिभिः स्वा
धीनः स्यात्पतिर्यस्याः स्वाधीनपतिकाहि सा सुरतोचितवारज्ञा सुरतस्योपयोगिनी संपादयति सामग्रीं या सा वासकसज्जिका
तस्य सविधे विधेयमभिकांक्षति २ उत्का यथा कार्यांतरासक्ततया कि सात्काध्यायति या भर्तुरनागमनकारणं ४० रतार्थिनी तु संकेतं
मद्यनार्यंतरासक्ततया थवा मां नजीवितेशः स्मरतीति मत्वा न जीवितेन्नाः स्मरतीति मन्ये अभिसारिका यथा विभ्राणा नांगनांगेषु भूषणं चं
दनं स्रजं अनंगाभिसरा रात्रौ दिवे वा याति कानने ४ ज्योत्स्नाभिसारिका यथा ओष्ठहस्तपदारुण्या राज्ञा यज्ञायने प्रिया चंद्रिकायां निर्वैवा रसु

© Dharmartha Trust J&K. Digitized by eGangotri

विप्रलब्धा यथा पापीयसा प्रेयसा यं विप्रलब्धा न केवलं लपनालाभमित्याह गणिकागणाकेन च पण्डिता यथा अधरे रदनक्षतं कपोले प्रियपत्रावलिमस्त्रि
रक्तिसीमानं अपनेतुमसि प्रभुर्न सख्यः परिवर्त्य शुक्रमागतो न किं स्याः ६ कलहान्तरिता यथा या तेसरोपदयितेतुमातन्नोतः परं कश्चन शोकहेतुः स्थिरं न चे
तो नयने न सुखं श्वासो न शीतोस्यो न चार्द्रं प्रोषितभर्तृका यथा कुसुमानि न केशेषु चंदनं न कलेवरे वरैविदेशेन त्वया व्यंग्यहीनं सुभाषितं प्रवत्स्य
त्यतिका यथा अश्वेन्द्रं दृष्टिं प्रकुर्वाणां वाणासनं करोनरः वर्षा व प्रेक्ष्य नयया वर्तिरम्यमयाधरा ७ विश्वासपात्रमित्यादि दूती दासी सखी कारुर्धात्रेयी
प्रतिवेशिका लिंगिनी शिल्पिनी स्वं च नेतृमित्रगुणान्विताः दासी प्रतिचारिका सखी स्नेहानिवद्धा कारुः रजकीप्रभृतिः धात्रेयी धात्री पुत्री प्रतिवेशिका समीप

विप्रलब्धाप्रियं तत्राहूतागतसंतापसंकुला ॥४१॥ खण्डिता रतिचिह्नाढ्यो यस्या आयाति नायकः कलहान्तरिता नाम यावमत्या प्रियं भवेत् ॥४२॥
प्रवासिनि प्रिये तप्ता ज्ञेया प्रोषितभर्तृका प्रवत्स्यति प्रिये तप्ता प्रवत्स्यत्पतिकेष्यते ॥४३॥ कुर्वन्तोप्यहितं भर्तुर्हितकर्यो त्तमा हि सा । हितारि
तं याच्चरति प्रियवन्मध्यमा च सा ४४ कुर्वत्यपि प्रियं पत्या वहितं कुरुते धमा ॥ इति ता स्त्रिविधास्तेयाः स्वभावप्रभवैर्गुणैः ४५॥ विश्वास
पात्रं विश्रामकारिणी पार्श्वचारिणी ॥ सखी तस्याः कर्म शिक्षा भूषा पालंभपूर्वकं ॥४६॥ गृहवर्तिनो लिंगिनी भिक्षुक्यादिः शिल्पिनी चित्रकारादि स्त्री
स्वयं चेति दूतीविशेषाः नायकमित्राणां पीठमर्दादीनां निसृष्टार्थत्वादिना गुणेन युक्ताः तथा च मालतीमाधवे कामंदकी प्रति प्राणेश्वरनिष्ठामहजश्वबोधः मा
गल्भ्यमभ्यस्तगुणा च वाणी कालानुरोधप्रतिभानवत्त्वमेते गुणाः कामदुघाः क्रियासु तत्र सखी यथा सरगशिशुं ह शालस्या स्ताप कथं कथयामि तेर
हनयनिता दृष्टा मूर्तिमया न हि वेधसी इति तु विदितं नारी रूपः स लोकदृशां सुधा तव शठ तया शिल्पोत्कर्षो विधेर्विघटिष्यते यथा च उपेक्षितासा
भवता नतांगी नतो स्फुमुदिृश्य वदामि किंचित् । रागं न दीयं तव निर्दयस्यं संसोष्यंतिनो का इति मे विषादः संघाः जाणाउ दहुसरिसं मिज्जणं मि जुज्जणं
ओम रउ न तुमं भणिस्सं मरणं पिसलाहणिज्जंसे अथ स्वयं दूती यथा ग्रामो तिदूरे रवि रस्तमेति प्रयासि चेद्याहि विराविराय यदि स्यात् एका किनी त्वां
कथमुत्सृजेहमेवं मतिस्थे न मदनः सहायः ॥ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

६ ॥ दशरूपके सखीकृतो नायिकापरिहासो यथा नखक्षतं वीक्ष्य पयोधरान्ते सख्येव मुक्तास्मयते स्म बाला अधिसकाग्यां समुदेति चंद्रो नोपत्यकां भाकिमिदं वधू
टि पूर्वोक्तभेदातिरिक्तो गुरुजनभीतभेदः सयथा। आयाति याति मद्वारी मासिखि वारिजलोचन ः एनं वरदपराधीने दीने को वा न वाग्रहः भुजंगभीताभेदोपि
आरामभ्रमतः कीड्रात्सुसारक्षपावालानलात् इति श्रुत्वा कुतं मातो हीनवक्त्रप्रभप्रभुः वर्ण्यंते नायका अत इति नेता विनीतो मधुरस्त्यागी दक्षः प्रियंवदः रक्त
लोकः शुचिर्वाग्मी रूढवंशः स्थिरो युवा बुद्ध्युत्साहस्मृतिप्रज्ञाकलामानसमन्वितः शूरो दृढश्च तेजस्वी शास्त्रचक्षुश्च धार्मिकः नेता नायकः मधुरः प्रिय
6 दर्शनः त्यागी सर्वस्वदायकः दक्षः क्षिप्रकारी स्थिरः वाङ्मनः क्रियाभिरचंचलः बुद्धिर्ज्ञानं प्रज्ञा गृहीतविशेषकारिणी भेदैश्चतुर्धा ललितशान्तदान्तोद्धतैर

परिहासश्च दंपत्योर्मिथः सख्याकृतस्तथा दूतव्यापारनिपुणा दूती संयोगकारिणी॥४७॥ विरहादेर्ज्ञापिका च वर्ण्यंते नायका अतः पति
श्चोपपतिश्चैव वैशिकश्च क्रमात्त्रयः वोढा पतिः स्मृतो रक्तो नित्यं वेश्यासु वैशिकः अन्योढाश्चोपपतिर्यः स्त्रीणामाश्रयो रते ः ४९॥ रक्तानुर
स क्तोनुकूलः समः सर्वासु दक्षिणः धृष्टः स्पष्टापराधोपि प्रियया पि निराकृतः ५०॥ निर्लज्जोस्यां समासक्तः शठः स्त्रीकपटे पटुः यथासंभवमे
तेषां भेदा ज्ञेया मनीषिभिः मानी च चतुरश्चेति भेदौ शठभेदौ प्रकीर्तितौ वाक्चेष्टाव्यंग्यसंयोगनिपुणाश्चतुरो मतः॥

यं निश्चिंतो धीरललितः कलासक्तः सुखी मृदुः मृदुः सुकुमारसत्त्वाचारः सामान्यगुणयुक्तश्च धीरशान्तो द्विजादिकः सामान्यगुणाः विनयादयः विप्रइ
ति वणिक्तत्त्विवाद्युपलक्षणं महासत्त्वोतिगंभीरः क्षमावानविकत्थनः स्थिरो निगूढाहंकारो धीरोदात्तो दृढव्रतः महासत्त्वः क्रोधाद्यनभिभूतः अ
विकत्थनः अनात्मश्लाघनः दृढव्रतः अंगीकृतनिर्वाहकः दर्पमात्सर्यभूयिष्ठो मायाछद्मपरायणः धीरोद्धतस्त्वहंकारी चलश्चंडो विकत्थनः
सदाक्षिण्यः शठो धृष्टः पूर्वा प्रत्यनपावृताः पूर्वा नायिका प्रत्यन्यया नायिकया नपहृतचित्तः दक्षिणोस्यां सहृदयः अस्मान्येष्टायां हृदयेन सहृदय
वहरति गूढविप्रियकृत् शठः यत्कृतवितथो धृष्टः अनुकूलस्त्वेकनायक इति दशरूपके॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥॥

© Dharmartha Trust J&K. Digitized by eGangotri

[illegible]

तेषामिति । तेषां नायकानां नर्मसचिवः क्रीडासहायः मंत्री सहायः सचीव इत्यमरः पताकानायकस्त्वन्यः पीठमर्दो विचक्षणः प्रागुक्तप्रासंगिकेतिवृत्तविशेष-पताकातन्नायकः पीठमर्दः प्रधानेतिवृत्तनायकस्य सहायः रामाय सुग्रीवः मालतीमाधवे मकरंदः एकविद्यो विटश्चान्यो हास्यकृच्च विदूषकः पीठमर्दः प्रधाने दिता विटः इति दशरूपके पीठमर्दो यथा अधरयोः करयोः सविषादयोरहणतां विधिनार चिता विना समुचितानर्मणैव भामिनि सा हरिविधि कर्मनयच्छति सफलं चेटो यथा मनो मनोभवलस्य सुदस्यति तुदस्यहा मानो मानोस्ति तेयान्नामु रंरीकुरुते नुकः विदूषको यथा ननमनं

तेषां च नर्मसचिवः पीठमर्दो विटस्तथा ॥ चेटो विदूषकश्चेति चतुर्धा भानुनोदितः ॥५३॥ पीठमर्दः प्रकुपितस्त्रीप्रसादक उच्यते विटः कामकलाभिज्ञश्चेटः संधानदक्षिणः ॥ अंगवाग्वेषवैकृत्यहासकारी विदूषकः ५४ आनुरागमानप्रवासकरुणात्मकः ५५ चतुर्धा विप्रलंभः स्यात्पूर्व रवौ ह्ययं गुरुः नवावलोकादिजन्यो कामवर्द्धितरागयोः एवानुरागो विज्ञेयो स्यत्पूर्वं स्नेहयोर्हर्ष्या मानप्रवासाबुदितौ पंचत्वे करुणास्तयोः एकस्मिन्नत्र हृतस्य वर्णनं क्रियते बुधैः अथ स्त्रीणामलंकारा वर्ण्यन्ते शास्त्रदर्शिता यौवने सत्त्वजास्तासामष्टाविंशतिरीरिताः अलंकारास्तत्र भावो हावो हेला स्त्रयो गजाः ५८॥ शोभा कान्तिश्च दीप्तिश्च माधुर्यं च प्रगल्भता औदार्यं धैर्यमित्येते सप्तैवास्युरयत्नजाः लीला विलासो विच्छित्तिर्विब्बोकः किलकिंचितं मोट्टायितं कुट्टमितं विभ्रमो ललितं मदः ६१ विहृतं तपनं मौग्ध्यं विक्षेपश्च कुतूहलं हसितं चकितं केलिरष्टादशसंख्यकाः स्वभावजाः स्युर्भा

मनसत्त्वनोपहतमममनोपहतं चनयच्छति ॥ इति निगद्यचकदेविदूषकः प्रमदया कृतविस्मयया हृतः अथेति यौवने सत्त्वजास्त्रीणामलंकाराश्च विंशतिः सत्त्वोद्भूता विंशतिरलंकारास्त्रीणां भवंति तत्र भावहावहेलास्त्रयोगजाः शोभा कान्ति दीप्तिर्माधुर्य प्रागल्भ्यमौदार्यं धैर्यमित्ययत्नजाः सप्त लीला विलासविच्छित्तिर्विभ्रमः किलकिंचित मोट्टायितं कुट्टमितं विब्बोक ललितं [illegible] भाव: निर्विकारात्मकात्सत्त्वा द्भावस्त्राद्यविक्रिया तत्र विकारहेतौ स

© Dharmartha Trust J&K. Digitized by eGangotri

हावः अल्पालापः शृंगारोद्भवोऽक्षिभ्रूविकारवित् प्रतिनियतांगविकारी शृंगारस्वभावविशेषो हावः हेला सा हेला सुव्यक्तशृंगाररससूचिका शोभा रूपोपभोग
तारुण्यैः शोभांगानां विभूषणं तां प्रादुरकीत्तत्र निवेश्य वालां क्षणांचलं वंतपुरोनिषण्णाः मृतार्थशोभाह्रियमाननेत्राः प्रसाधने संनिहितेपि नार्यः कांतिः मन्म
थाप्यायितच्छाया सैव कांतिरितिस्मृता शोभैव रागावतारघनीकृता कांति यथा उन्मीलद्वदनेंदुदीप्तिविसरैर्दूरे समुत्सारितं भिन्नं पीनकुचस्थलस्य च रुचा
हस्ताभाभिर्हतं एतस्याः कलविंककंठ कदलीकल्पं मिलत्कौतुकादप्राप्तांगसुखं रुषेव सहसा केशेषु लग्नं तमः माधुर्ये अनुल्बणत्वं माधुर्यं सरसिजम
नुविद्धं शैवलेनापि रम्यं मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति॥ इयमधिकमनोज्ञा वल्कलेनापि तन्वी किमिव हि मधुराणां मंडनं नाकृतीनां॥ दीप्तिः

नेत्रादिविकृतिर्ध्यायो भावो हावो रतीच्छकः॥ हेला स्यंतसमालक्ष्यो हाव एवादितक्रमात्॥६४॥ रूपयौवनरागाद्यैः शोभा स्यादंगभूष
णं मन्मथोन्मेषणा सेव विस्तीर्णा कांतिरुच्यते॥६५ कांतिरेवातिप्रकाशा दीप्तिरित्यभिधीयते॥ सर्वावस्थाविशेषेषु माधुर्यं रमणीयता
निःसाध्वसत्वं प्रागल्भ्यमौदार्यं विनयः सदा मुक्तात्मश्लाघना धैर्यं मनोवृत्तिरचंचला॥६७॥ अंगैर्वेषैरलंकारैः प्रेमभिर्वचनैरपि प्रति
प्रयोजितैर्लीला प्रियस्यानुकृतिं विदुः॥६८॥ कांतेरुत्कर्षविस्तृतिः यथा देआ पसीअ णिअत्तसु मुहससिजोह्णाविलुत्ततमणिवहे अभिसारिआअणा

णविग्घं करेसि अण्णाणविहसिअ प्रागल्भ्यं निःसाध्वसत्वं प्रागल्भ्यं क्षोभपूर्वकोंगसादः साध्वसं तदभावः प्रागल्भ्यं तया व्रीडाविधेयापि तथा मुग्धापि सुं
दरी कलाप्रयोगचातुर्ये सभास्वाचार्यकं गता औदार्यं औदार्यं औदार्यं प्रश्रयः सधैर्यं चापलाविहता धैर्यं निवृत्तिरविकत्थना चापलानुपहता मनो
वृत्तिरात्मगुणानाख्यापि का धैर्यमिति ज्वलतु गगने रात्रौ रात्रावखंडकलः शशी दहतु मदनः किं वा मृत्योः परेण विधास्यति मम दयितः श्लाघ्य
स्तातो जनन्यमलान्वया कुलममलिनं न त्वेवायं जनो न च जीवितं लीला प्रियानुकरणं लीला मधुरांगविचेष्टितैः [illegible] नेनोदितं वदति यान्ति तथा
सावित्यादि भागवते दशमस्कंधे त्रिंशत्तमोऽध्याये गत्यानुरागेत्यादिना॥६९॥

© Dharmartha Trust J&K. Digitized by eGangotri

विलास: तात्कालिको विशेषस्तु विलासोंगक्रियोक्तिषु दयितावलोकनादिकालेंगक्रियायां वचने च यः सति रागविशेषो निर्विलास: अत्रांतरेकिमपि वाग्विभवा
तिहन्त वैचित्र्यमुल्लसितविभ्रममुत्पलाक्ष्या: तद्भूरिसात्विकविकारविशेषरम्यमाचार्यकं विजयि मान्मथमाविरासीत् । विच्छित्ति: आकल्परचनाल्पापि
विच्छित्ति: कांतिपोषकृत् कर्णार्पितो लोध्रकषाये रूक्षे गोरोचनाभेदनितांतगौर: तस्या: कपोले परभागलाभाद्बबंध चक्षूंषि यवप्ररोह: कुरुघुवं
गत्रयोस्संसर्गे जयं सुजातो नुगिरं नमा त इत्यादि विब्बोक: गर्वाभिमानादिष्टेपि विब्बोको नादरक्रिया समार्जंतिलककालकाननविरतलोलांगुलि: संस्प
गन्वारं वारमुदंचयन्कुचतटे प्रोदंचि वीनां चलं । यद्भ्रूभंगतरंगितांचितदृशा सावज्ञमालोकितस्तद्गर्वाद्वाधीरितोस्मि न पुन: कांतेकृतार्थीकृत:
यत्तु माघ: कितावासूरसिसरोजमेदाहो स्विन्मुखमवभोसते युवत्या ।। संभ्रांतपक्ष्मणामिति निभृतकायकस्त्रिहिद्धकेर्वकसह चारिणां परोक्षे: तन्न विब्बोक
यानस्यानामननादीनां मुखनेत्रादिकर्मणां ।। विशेषस्तु विलास: स्यादिष्टसंदर्शनादिना ६९ स्तोकामाल्यादिरचनाविच्छित्ति: कांतिपोष
कृत् विब्बोकस्त्वतिदर्पेण वस्तुनीष्टेप्यनादर: ७० क्रोधश्रमत्रासहासशुष्करोदनसंकरं अभीष्टसंगजाद्धर्षादुदेति किलकिंचितं ।। ७१
तद्भावभाविते चित्ते वल्लभस्य कथादिषु मोट्टायितमिति प्राहु: कर्णकंडूयनादिकं ।। ७२ ।। स्यकस्यकेवलं मुखवर्त्तित्वाभावात् यत्तु भमरसिंह: स्त्री
णां विलासविब्बोकविभ्रमाललितं तथा हेला लीलेत्यमी हावा: क्रिया: शृंगारभावजा इति तदपि न आचार्यै: सर्वेषां भेदवर्णनात् किलकिंचितं क्रोधाश्रु
हर्षभीत्यादे: संकर: किलकिंचितं रतिक्रीडाद्यूते कथमपि समासाद्य समयं मया लब्धे तस्या: क्वणितकलकंठैमधुरं कृतभ्रूभंगासोपकृतिविलक्षाद्रु
हदितस्मितक्रुद्धभ्रांतं पुनरपि विदध्यान्मयि मुखं यत्तु श्रीहर्ष: सपि वीर विराजते परं समयंतीकिलकिंचिते किंचितं किलकिंचिताहृतानी
स्तनरूपवदीप्यते मणिहाराविलरामणीयकमिति तन्न संगाभावात् भविष्यत्सामीप्ये वर्त्तमानवद्भाव इति वदसि चेत् दृष्टांतानुपपत्ते: माघोव
भ्रामविब्बोकेनत्रेवामनाम्येक: ताभ्यामसमोमया दृष्ट: श्रीहर्ष: किलकिंचिते मोट्टायितुं तद्भावभावनेष्टकथादिषु प्रियतयानुरागेणाभवितान: करणं तवि

लितंचक्रेमुखेंदुमवक्रोबसा ७२

म

[illegible]

कुट्टमितं सानंदान्तः कुट्टमितं कुप्येत्केशाधरस्यग्रहे दष्टेऽधरे प्रणयिना विधुताग्रपाणेः सीत्कारशुष्करुदितानि जयंति नार्याः विभ्रमः विभ्रमस्त्वायाकाले
८ भूषास्थानविपर्ययः भागवतेपि दशमस्कंधे व्यत्यस्तवस्त्राभरणा इति अभ्युद्गते शशिनि कोमलकांतदूतीसंलापसंवलितलोचनसाभिः जग्राहि
मंडनविधिर्विपरीतभूषाविन्यासहासितसखीजनमंगनाभिः ललितं सुकुमारो विन्यासो मसृणो ललितो भवेत् संभ्रमभंगकर किसलययावर्तनैरा
8 लपंतीसा पश्यंती ललितललितं यौवस्याचलेन विन्यस्यंतीचरणकमले लीलया स्वैरयानैर्निःसंगीतं प्रथमवयसा नर्तिताप कंजाक्षी विहृतं श्रा

केशास्त्रनाधरादीनां ग्रहे हर्षेपि संभ्रमात् आहुः कुट्टमितं नेति शिरःकरविधूननं ७३ तरयाराग हर्षादेर्दयितागमनादिषु अस्थाने
भूषणादीनां विन्यासो विभ्रमो मतः ७४ सुकुमारतयांगानां विन्यासो ललितं विदुः मदो विकारः सौभाग्ययौवनाद्यवलेपजः ७५॥ वक्त
व्यकालेप्यवचो व्रीडया विहृतं मतं तपनं प्रियविच्छेदे स्मरावेगोत्थचेष्टितं ७६॥ अज्ञानादिव संपृच्छा प्रतीतस्यापि वस्तुनः दयितस्य पुरः
प्रोक्तं मौग्ध्यं तत्तत्ववेदिभिः ७७ भूषाणामर्द्धरचना व्यथा विष्वगवेक्षणं रहस्याख्यानमीषच्च विक्षिप्तो दयितांतिके ७८ रम्यावस्तुसमालो
के लोलता स्यात्कुतूहलं हसितं तु वृथाहासो यौवनोद्भेदसंभवः ७९॥ कुतोपि दयितस्यापि तस्याग्रे चकितं भयसंभ्रमः विद्रारे सह कांते

न कालंन्वयद्भुयात् व्रीडयावितिहृतं हितत् पादांगुष्ठेन भूमिं किसलयरुचिना सापदेशांलिखंती भूयोभूयः क्षिपंती मयि सितशबले लोलतारे वक्त्रंह्रीवभ्र
मीषत्स्फुरदधं वाक्यगर्भं दधाना यन्मां नोवाच किंचित् स्थितमपि हृदये मानसं तद्दुनोति रम्येति रघुवंशे करेण वातायनलंबितेन स्पृष्टस्त्वया चंडि
कुतूहलेनन्या आमुंचती वाभरणं द्वितीयमुद्भिन्नविद्युद्वलयो घनस्त इति कुतश्चित् त्रस्यंती चलशफरीविघट्टितोरुर्वामोरूरतिशयमाप विभ्रमस्य स्तु

[illegible]

© Dharmartha Trust J&K. Digitized by eGangotri

त्रयस्त्रिंशद्व्यभिचारिणो ह निर्वेद इति तत्त्वज्ञानापदीर्ष्यादेर्निर्वेदः स्वावमानं तत्र चिन्ताश्रुनिःश्वासवैवर्ण्यदीनता तत्त्वज्ञानान्निर्वेदो यथा प्राप्ताः
सकलाः कामदुघास्ततः किं दत्तं पदं शिरसि विद्विषतां ततः किं संप्रीणिताः प्रणयिनो विभवैस्ततः किं कल्पस्थितं तनुभृतां तनुभिस्ततः किं आपद्यथा राज्ञो वि
पद्बन्धुवियोगदुःखं देशच्युतिर्दुर्गममार्गखेदः आस्वाद्यतेऽस्याः कटुनिष्फलायाः फलं तदेतच्चिरजीवितायाः ईर्ष्यातो यथा संतानितन्धुनि मेघ॥
न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः धिक् शक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा
स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः वीरशृंगारयोर्व्यभिचारी निर्वेदो यथा ये वाहवो युधि न वैरिकठोरकण्ठपीठोच्छलद्रुधिररा
धिरराजिविराजिविराजितांशाः नापि प्रियापृथुपयोधरपत्रभंगसंक्रान्तकुंकुमरसाः खलु निष्फलास्ते सात्मानुरूपं तरुणीजनं वा लभमान

निर्वेदो ग्लानिशंके च मदोऽसूयाश्रमोऽपि च

स्य निर्वेदादियमुक्तिः एवं रसान्तरामप्यंगभाव उदाहार्यः रसाङ्गः स्वतन्त्रो निर्वेदो यथा कस्त्वं भोः कथयामि दैवहतकं मां विद्धि शाखोटकं वैराग्यादिव वक्षि
साधु विदितं कस्मादिदं श्रूयतां वामेनात्र वटस्तमध्वगजनः सर्वात्मना सेवते नो छायापि परोपकारकरिणी मार्गस्थितस्यापि मे विभानुभावरसांगा
नंगभेदादनेकशस्त्वो निर्वेदो दर्शनीयः अथ ग्लानिः रत्यायासतृट्क्षुद्भिर्ग्लानिर्निष्प्राणतेह च वैवर्ण्यकंपानुत्साहक्षामांगवचनक्रिया निधु
वनकालाभ्यासादिश्रमतृषाक्षुदुमनादिभिर्निष्प्राणताहृघाग्लानिः अस्यां च वैवर्ण्यकंपादयोऽनुभावाः यथा लुलितनयनताराः क्षामवक्त्रेन्दुबिं
बा रजनय इव निद्राक्लान्तनीलोत्पलाक्ष्यः तिमिरमिव दधानाः स्रंसिनः केशपाशानवनिपतिगृहेभ्यो यान्त्यमूर्वारवध्वः शेषं निर्वेदवदूह्यं॥ श्री॥
अथ शंका अनर्थप्रतिभा शंका परक्रौर्यात्स्वदुर्नयात् कंपशोकाभिवीक्षादिरत्र वर्णास्वरान्यता तत्र परक्रौर्याद्यथा ह्रियासर्वस्यासौ हरति विदितास्मी

© Dharmartha Trust J&K. Digitized by eGangotri

४

६ ति वदनं द्वयोर्हर्षाल्लापं कलयति कथामात्मविषयां सखीषु स्मेरासु प्रथयति च वैलक्ष्यमसंमंत्रिया प्रायेणास्ते हृदयनिहितां तं कविधुरं सदुर्न्याय्यथा
9 दूराद्दृष्टीयोधरणीधरामंयस्ता स्वके यंत्रणा वद्मधूनोत्र हृतासु वाहो रपिनाटकारिः सराजपुत्रो हृदि बाधतेमां अनयारि शान्यदनुसर्तव्यं अथमदः
हर्षोत्कर्षो मदः पानात्स्खलदंगवचोगतिः निद्राहासोत्र रुदितं ज्येष्ठमध्याधमादिषु यथा हावहारि हसितं वचनानां कौशलं दृशि विकारविशेषाः
चक्रिरे भृशमजोऽपि वधूनां कामिनेव हृणेन मदेन इत्यादि अथासूया परोत्कर्षाक्षमासूयागर्वदौर्जन्यमन्युजा दोषोक्तावज्ञाभ्रुकुटिमन्युक्रोधें
गितानि च गर्वजा यथा। अर्पितेऽप्यकृतीकृतेपि न फलप्राप्तिः प्रभोः स्फुतदुष्प्रसारथि विहरद्व चरितो युक्तस्तया कन्यया उत्कर्षं च रसमानयशविः
स्रंसनं वात्मनः स्त्रीरत्नं च जगत्यति रत्नामुखोहमः कथं सहिष्यते दौर्जन्यजा यथा यदि परगुणान क्षमते यतः स्वगुणार्जने नहि परयशोनिंदाव्या
जैरल्पं परिमार्जितुं विरमासि न चेदिच्छा द्वेषप्रसक्तमनोरथो दिनकरकरान्पाणिच्छत्रेर्नुदन्श्रममेष्यसि मन्युजा यथा पुरस्तन्व्या गोत्रस्खलन
चकितोहं नतमुखः प्रहितो वेल्लस्याः किमपि लिखितुं दैवहतकः स्फुटो रेखान्यासः कथमपि सता दृक्कारिणा तोगतायेन व्यक्तिं पुनरवयवैः सैव
तरुणी नतश्वासाभिज्ञाय स्फुरदरुणगंडस्थलरुचा मनस्विन्या कोपप्रणायरभसाद्गद्गदगिरा अहो चित्रं चित्रं स्फुटमिति निगद्याश्रुकलुषं रु
षा ब्रह्मास्त्रं मे शिरसि निहितो वामचरणः अथ श्रमः खेदोऽध्वरत्यादेः स्वेदोऽस्मिन्मर्दनादयः अध्वजो यथा अलसलुलितमुग्धान्यध्वसंपातखे
दादिशिथिलपरिरंभैर्दत्तसंवाहनानि परिमृदितमृणालीदुर्बलान्यंगकानि त्वमुरसि मम कृत्वा यत्र निद्रामवाप्ता रतिश्रमो यथा प्राप्य मन्म
थमदादतिभूमिं दुर्वहस्तनभराः सुरतस्य शश्रमुः श्रमजलार्द्रललाटश्लिष्टकेशमसितायतकेशः इत्याद्युन्नेयं ॥

© Dharmartha Trust J&K. Digitized by eGangotri

ध्यानंचित्तेहितानाप्तेः शून्यताश्वासतापकृत् । यथा पक्ष्माग्रग्रथिताश्रुबिंदुनिकरैर्मुक्ताफलस्पर्द्धिभिः कुर्वंत्या हरहासहारि हृदये हारावलीभूषणं
बाले बालमृणालनालवलयालंकारकान्ते करे विन्यस्याननमायताक्षि सुकृती कोयं त्वया स्मर्यते यथा वा अस्तमितविषयसंगा मुकुलितनयनो
त्पला बहुश्वसिता ध्यायति किमप्यलक्ष्यं बाला योगाभियुक्तेव अथ स्मृतिः सदृशज्ञानचिंताद्यैः संस्कारात्स्मृतिरत्र च तार्क्ष्ये सापि तानत्वेना
धर्भासिन्यां भ्रूसमुन्नयनादयः यथा । मेनाकः किमयं रुणद्धि गगने मन्मार्गमव्याहतं शक्तिस्तस्य कुतः स वज्रपतनाद्भीतो महेन्द्रादपि तार्क्ष्यः सोपि समं
निजेन विभुना जानाति मां रावणमाः ज्ञातं स जटायुरेव जरसा क्लिष्टो वधं वांछति यथा माधवः ममहि प्राक्तनोपलंभसंभावितात्मजन्मनः संस्का
रस्यानवरतप्रबोधात्प्रतीयमानस्तद्विसदृशैः प्रत्ययांतरैरतिरस्कृतप्रवाहः प्रियतमास्मृतिप्रत्ययोत्पत्तिसंतानस्तन्मयति वक्रोत्यन्तर्वृत्ति
सारूप्यतस्तत्तन्मयं लीनेव प्रतिबिंबितेवेत्यादि अथ धृतिः संतो षोज्ञानशक्त्यादेर्धृतिरव्यग्रभोगकृत् ज्ञानाद्यथा वयमिह परि
पीतुष्टा वल्कलैस्त्वं च लक्ष्म्या सम इह परितोषो निर्विशेषो वि चिंतास्मृतिधृतिर्मोहो शेषः स च भवतु दरिद्रो यस्य तृष्णा विशाला मनसि च परितु
ष्टे कोर्थवान्को दरिद्रः शक्तितो यथा राज्यं निर्जितशत्रु योग्यसचिवे न्यस्तः समस्तो भरः सम्यग्लालपालिताः प्रशमिताशेषोपसर्गाः प्रजाः प्रद्यो
तस्यासुता वसंतसमयस्त्वं चेति नाम्ना धृतिं कामः काममुपैतु यं मम पुनर्मन्ये महानुत्सवः इत्याद्यूह्यं अथ मोहः मोहो विचित्तताभीतिदुःखावे
गानुचिंतनैः तत्राज्ञानभ्रमाघातघूर्णनादयः यथा तीव्राभिषंगप्रभवेन वृत्तिं मोहेन संस्तंभयतेंद्रियाणां अज्ञातभर्तृव्यसना मुहूर्तं कृतो
पकारे रतिर्बभूव यथा च विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा प्रबोधो निद्रा वा किमु विषविसर्पः किमु मदः तव स्पर्शे स्पर्शे मम हि
वीमूढेंद्रियगणो विकारश्चैतन्यं भ्रमयति च संमीलयति च ॥ ७ ॥ ७ ॥ ॥ ७ ॥ ७ ७ ॥ ८ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

१० अथव्रीडा दुराचारादिभिर्व्रीडाधार्ष्ट्याभावस्तमुन्नयेत् सा चीकृतांगावरणावैवर्ण्याधोमुखादिभिः यथा पटोलग्नेपत्न्यो नमयति मुखं जातविनयाहठा
श्लेषं वांछत्यपहरति गात्राणि निभृतं न शक्नोत्याख्यातुं स्मितमुखसखीदत्तनयनाह्रिया ताम्यत्यन्तः प्रथमपरिभोगे नववधूः अथालस्यं आलस्यं
श्रमगर्भादेर्जैह्म्यं जृंभासितादिमत् यथा चलति कथंचित्पृच्छ्यमाना स्फुटति वचनं कथंचिद्दालीनां आसितुमेव हि मनुत्ते गुरुगर्भभरालसा सुतनुः
अथदीनता दौर्गत्याद्यैरनोजस्यं दैन्यं काष्ण्यामृजादिमत् दारिद्र्यन्यक्कारादिविभावैरनोजस्कता चेतसो दैन्यं तत्र च कृष्णतामलिनत्वमेनर
र्शनादानादयोनुभावाः यथा वृद्धोन्धः पतिरेष मंजकगतः स्थूनावशेषं गृहं कालोभ्यर्णजलागमः कुशलिनी वत्सस्य वार्त्तापि नो यत्नात्संचिततैल
बिंदुघटिका भग्नेति पर्याकुला दृष्ट्वा गर्भभरालसां निजवधूं श्वश्रूश्चिरं रोदिति अथ शंशृं वेवात् अथ चापलं मात्सर्यद्वेषरागादेश्चापलंत्वनवस्थि

व्रीडालस्यं च दीनता चापल्यं हर्षः

तिः तत्र भर्त्सनपारुष्यस्वच्छंदाचरणादयः यथा अन्या सुतावदुपमर्दसहा सुभृंगलोलं विनोदय मनः
सुमनोलतासु बाला म जातरजसं कलिकाम काले व्यर्थं कदर्थयसि किं नवमल्लिकायाः यथवास्तु विनिकृषणारणात्कठोरदंष्ट्राककचविसं
कटकं करोदराणि अहमहमिकया पतन्तु कोपात्सममधुनैव किमत्र मन्मुखानि अथवा प्रस्तुतमेतावत्सुंदरि हितं करिष्ये अथ हर्षः प्रसत्ति
रुत्सवादिभ्यो हर्षोश्रुस्वेदगद्गदाः प्रियागमनपुत्रजननोत्सवादिविभावैश्चेतः प्रसादो हर्षः तत्र चाश्रुस्वेदगद्गदादयोनुभावाः यथा आया
ते दयिते मरुस्थलभुवां संचिंत्य दुर्लंघ्यतां गेहिन्या परितोषबाष्पकलिलामासज्य दृष्टिं मुखे दत्त्वापीलुशमीकरीरकवलान्स्वेनांचले
नादराडुन्मृष्टं करभस्य केसरसटाभाराग्रलग्नं रजः निर्वेदवदन्यद्दुन्नेयम्॥॥ छ॥ ॥ छ॥ छ॥ छ॥ छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

अथावेगः आवेगः संभ्रमोस्मिन्नभिसरजनिते शस्त्रनागाभियोगो वात्यायां स्पर्वदिग्धस्त्वरितपदगतिर्वर्षजे पिंडितांगः उत्पातात्स्रस्ततांगेष्वहि
तहितकृते शोकहर्षानुभावा वन्हेर्धूमाकुलास्यः करिजमनुभयस्तंभकंपापसाराः अभिसरो राजविद्रवादिस्तद्धेतुरावेगो यथा आगच्छागच्छ
सज्जं कुरु वरतुरगं संनिधेहि द्रुतं मे खड्गः क्वासौ कृपाणीमुपनय धनुषा किं किमंगप्रविष्टं स्थितेन संरंभोन्निद्रितानां क्षितिभृति गहनेन्योन्यमेवं प्रतीपं नारदः स्वप्ना
सिद्दृष्टे त्वयि चकितधियां विद्विषामाविरासीत् यथा च प्रारब्धां तरुपुत्रकेषु सहसा संत्यज्य सेकक्रियामेतास्तापसकन्यकाः किमिदमित्यालोकयंत्याकुलाः
आरोहंत्युटजद्रुमांश्च बटवो वाचंयमाः सत्वरं सद्यो मुक्तसमाधयो निजवृषीष्वेवोच्चपादस्थिताः वात्यावेगो यथा वाताहतं वसनमाकुलमुत्तरीयमित्यादि
वर्षजो यथा देवे वर्षत्यशनपचनव्यापृता वन्हिहेतोर्गेहाद्गेहं फलकनिचितैः सेतुभिः पंकभीताः । नीध्रप्रांतानविरलजलान्पाणिभिस्ताडयित्वा शूर्पच्छत्र
स्थगितशिरसो योषितः संचरंति उत्पातजो यथा पौलस्त्यपीनभुजसंपदुदस्यमानकैलाससंभ्रमविलोलदृशः प्रियायाः श्रेयांसि वो दिशतु निन्हुत
कोपचिह्नमालिंगनोत्पुलकभासितमिंदुमौलेः आवेगो अहितकृतः स्वानिष्टदर्शनश्रवणाभ्यां उदात्तराघवे चित्रमायः ससंभ्रममभगवन्कु
लपते रामभद्र परित्रायतामित्याकुलतां नाटयतीत्यादि पुनश्चित्रमायः मृगरूपं परित्यज्य विधाय विकटं वपुः नीयते रक्षसा तेन लक्ष्मणो युधि संशयं रा
मः वत्सस्याभयवारिधेः प्रतिभयं मन्ये कथं राक्षसात्त्रस्तश्चैष मुनिर्विरौति न पुनश्चास्येव मे संभ्रमः माहासीर्जनकात्मजामिति मुहुः स्नेहाद्गुरुर्याचते न स्था
तुं न च गंतुमाकुलमतेर्मूढस्य मे निश्चयः इत्यनेनानिष्टप्राप्तिकृतः संभ्रमः इष्टप्राप्तिकृतो यथा तत्रैव प्रविश्यापटीक्षेपेण संभ्रांतो वानरः महाराज
एदं खु पवणणंदणागमनपरिहासेत्यादि देवस्स हिदआनंदजणणाणविलुलिदं महुवणमित्यंते यथा वीरचरिते । एह्येहि वत्स रघुनंदनेत्यादि वन्हि
जो यथा क्षिप्तो हस्तावलग्नः प्रसभमभिहतोप्याददानोंशुकान्तमित्यादि यथा च विरम विरम वन्हे इत्यादि करिजो यथा सञ्छिन्नबंधद्रुतयुग्यशू
त्रा न्यंभग्नाक्षपर्यस्तरथं रथेन रामापरिभ्राणविहस्तयोधं सेनानिवेशं तुमुलं चकार करिग्रहराणां व्यालोपलक्षणार्थम् तेन व्याघ्रभल्लूकवानरादिप्रभवा

© Dharmartha Trust J&K. Digitized by eGangotri

अथविषादः प्रारब्धकार्यासिद्ध्यादेर्विषादः सत्वसंक्षयः निःश्वासोच्छ्वासहृत्तापसहायान्वेषणादिकृत् यथाह आर्येताडकेकिंहिनामेतत् अंबुनिम
२१ ज्जंत्यलाबूनि ग्रावाणः प्लवन्ते नन्वेषराक्षसपतेः स्खलितः प्रतापः प्राप्तोद्भुतः परिभवोहि मनुष्यपोतात् दृष्टः स्थितेन च मया स्वजनप्रमाथोदूयं
जराच निरुणद्धि कथंकरोमि यथावा अर्थितोप्रकटीकृतइत्यादि अथ जडता अप्रतिपत्तिर्जडता स्यादिष्टानिष्टदर्शनश्रुतिभिः अनिमिषनयननि
रीक्षणतूष्णीम्भावादयस्तत्र इष्टदर्शनाद्यथा एवमालिनि गृहीतसाध्वसं शंकरोरहसि सेव्यतामिति सा सखीभिरुपदिष्टमाकुलानास्मरत्प्रमुख
वर्तिनि प्रिये अनिष्टश्रवणाद्यथा उदात्तराघवे राक्षसः तावन्तस्ते महात्मानो निहताः केन राक्षसा येषां नायकतां प्राप्तास्त्रिशिरःखरदूषणाः द्विती
यः गृहीतधनुषा रामहतकेन प्रथमः किमेकाकिनैव द्वितीयः अहदृष्टाकः प्रत्येति पश्यतावत्तास्मद्बलस्य सद्यश्छिन्न।
शिरश्चक्रमज्जत्कंककुलाकुलाः कबंधाः केवलं विषादो जडता तथा॥ जातास्तालोत्तालारणांगणे प्रथमः यद्येवं तदहमेवंविधः किंकरो।
मि अथौत्सुक्यं कालाक्षमत्वमौत्सुक्यं रम्येच्छारति औत्सुक्यं निद्रागर्वश्च संभ्रमैः तत्रोच्छ्वासत्वराश्वासहृत्तापस्वेदविभ्रमाः यथा आत्मान
मालोक्य च शोभमानमादर्शबिंबे स्तिमितायताक्षी हरोपयाने त्वरिता बभूव स्त्रीणां प्रियालोकफलो हि वेषः अथ निद्राम
नःसंमीलनं निद्राचिंतालस्यक्लमादिभिः तत्रजृम्भांगभंगाक्षिमीलनोच्छ्वसनादयः यथा निद्रार्धमीलितदृशो मदमंथराणि नाप्यर्थवंति न च यानि नि
रर्थकानि अद्यापि मे मृगदृशो मधुराणि तस्यास्तान्यक्षराणि हृदये किमपि ध्वनंति यथा च प्रहरकमपनीय स्वं निनिद्रासतोच्चैः प्रतिपदमुपहूतः के
नपि जागृहीति मुहुरविशदवर्णां निद्रया शून्यशून्यां दधदपि गिरमंतर्बुध्यते नो मनुष्यः अथ गर्वोभिजनलावण्यबलैश्वर्यादिभिर्मदः कर्मण्यधर्ष
णावज्ञासविलासांगवीक्षणं यथा मुनिरयमथ वीरस्तादृशस्तत्प्रियं मे विरमतु परिकंपः कातरे क्षत्रियासि तपसि विततकीर्तेर्दर्पकंडूलदोष्णः परि
चरणसमर्थो राघवः क्षत्रियोहं यथा वा ब्राह्मणातिक्रमत्यागो भवतामेव भूतये॥ जामदग्न्यस्तु वो मित्रमन्यथा दुर्मनायते॥ छ॥ छ॥ छ॥ छ॥

© Dharmartha Trust J&K. Digitized by eGangotri

अथवितर्कः। तर्कोविचारः संदेहाद्भ्रूशिरोंगुलिनर्तकः यथा किंलोभेनविलंघितःसभरतोयेनैतदेवंकृतंसद्यः स्त्रीलघुतांगताकिमथवामातैवसामध्यम
मा मिथ्यैतन्ममचिंतितंद्वितयमप्यार्योनुजोसौगुरुर्मातातातकलत्रमित्यनुचितंमन्येविधात्राकृतं अथवा कः समुचिताभिषेकादार्यंप्रच्यावयेद्
दुरात्विप्नं मन्येममैवपुरायैस्सेवावसरः कृतोविधिना अथापस्मृतिः आवेशोग्रहदुःखाद्यैरपस्मारोयथाविधः भूपातकंपप्रस्वेदलालाफेनोद्गमादय
यः यथा आश्लिष्टभूमिंरसितारमुच्चैर्लोलद्भुजाकारबृहत्तरंगं फेनायमानंपतिमापगानामसावपस्मारिणमाशशंके। अथसुप्तं सुप्तंनिद्रोद्भवं
तत्रश्वासोच्छ्वासक्रियापरं यथा लघुनिनलिनीकुलेरेक्षत्रैकोरोयवानांनवकलमपत्रालस्तस्तरेसोपधाने परिहरतिसुषुप्तंहालिकद्वंद्वमारात्कुच
कलशमहोष्मावद्धरेखस्तुषारः अथविबोधः विबोधः परिणामादेस्तत्रजृंभाक्षिमर्दनेयथा चिरतपरिखेदप्राप्तनिद्रासुखानांचरममपिशयित्वा
एवमेव प्रबुद्धाः अपरिचलितगात्राः कुर्वते न प्रियाणामशिथिलभुजचक्राश्लेषभेदंतरुण्यः अ
थामर्षः अधिक्षेपापमानादेरमर्षोभिनिविष्टता त त्रस्वेदशिरःकंपतर्जनाताडनादयः यथा प्राय
श्चित्तंचरिष्यामिपूज्यानांवोव्यतिक्रमात् नत्वेव दूषयिष्यामि शस्त्रग्रहमहाव्रते यथा च सुयश्छा

वितर्कोपस्मृतिस्तथा ८२। सुप्तंविबोधो
मर्षश्चाप्यवहित्थमथोग्रता श्री॥ ॥

सनलघनांभसिमयो मग्नेनानामस्यितंमाप्रानामविगर्हणा स्थितिमतांमधमेनुजानामपि क्रोधोल्लासितशोणितारुणगदस्योच्छिंदतः कौरवान
द्यैकदिवसंममासिनगुरुर्नाहंविधेयस्तव अथावहित्थं लज्जाद्यैर्विक्रियागुप्तावहित्थांगविक्रिया यथा एवंवादिनिदेवर्षौपार्श्वेपितुरधोमुखी
लीलाकमलपत्राणिगणयामासपार्वती अथोग्रता दुष्टेपराधेदौर्मुख्यचौर्यैश्चंडत्वमुग्रता तत्रस्वेदशिरःकंपतर्जनाताडनादयः यथाजा
मदग्न्यः उत्कृत्योत्कृत्यगर्भानपिशकलयतःक्षत्रसंतानरोषादुद्दाममस्यैकविंशत्यवधिविशसतःसर्वतोराजवंश्यान् पित्र्यंतद्रक्तपूर्णह्र
दसवनमहानंदमंदायमानंक्रोधाग्निंकुर्वतोमेनखलुनविदितःसर्वभूतैःस्वभावः छ॥ छ ॥ ॥ ॥ छ ॥ छ॥ छ।

© Dharmartha Trust J&K. Digitized by eGangotri

१२

अथव्याधिः व्याधयः सन्निपाताद्यास्तेषामन्यत्रविस्तरः दिङ्मात्रंतुयथा अच्छिन्नंनयनांबुबंधुषुकृतंचिंतागुरुष्वर्पिताद्दत्तंदैन्यमशेषतःपरि
जनेतापः सखीष्वाहितः अद्यश्वःपरनिर्वृतिंव्रजतिसाश्वासैःपरंखिद्यतेविस्रब्धोभवविप्रयोगजनितंदुःखंविभक्तंतया अथमतिः भ्रांतिच्छेदो
पदेशाभ्यांशास्त्रादेस्तत्वधीर्मतिः यथा सहसाविदधीतनक्रियामविवेकःपरमापदांपदं वृणुतेहिविमृश्यकारिणंगुणलुब्धाःस्वयमेवसंपदः
यथाच नपंडिताःसाहसिकाभवंतिश्रुत्वापितेसंतुलयंतितत्वं तत्वंसमादायसमाचरंतिस्वार्थंप्रकुर्वंतिपरस्यचार्थं अथोन्मादः अप्रेक्षाकारि
तोन्मादः सन्निपातग्रहादिभिः तस्मिन्नवस्थानरुदितगीतहासासितादयः यथा आःक्षुद्रराक्षसतिष्ठतिष्ठक्वमेप्रियतमामादायगच्छसीत्युपक्र

व्याधिर्मतिस्तथोन्मादोमरणंत्रासएवच॥ ८३॥ स्तंभःस्वेदोथरोमांचःस्वरभंगोथवेपथुः वैवर्ण्यमश्रुप्रलयइत्यष्टौ
सात्विकामताः ८४॥ प्रथमेत्वभिलाषःस्याद्द्वितीयेचिंतनंभवेत् तृतीयेतुस्मृतिःप्रोक्ताचतुर्थेगुणकीर्तनं ८५ उद्वेगः
पंचमेप्रोक्तोलापःषष्ठउच्यते उन्मादःसप्तमेप्रोक्तोभवेद्व्याधिस्तथाष्टमे ८६॥ नवमेजडताप्रोक्तादशमेमरणंभवेत्
दृढत्समासागौडीस्याद्रौद्रेवीरेहसेरसे ८७॥ द्वित्रिपदयुक्तसमासावैदर्भीरीतिराख्याता शृंगारशांतकरुणबीभत्सभया
नकद्भुतयोस्या ८६॥ मेकृष्टं। नवजलधरःसंनद्धोयंनदृप्तनिशाचरः सुरधनुरिदंदूराकृष्टंननामशरासनं अयमपिपटुर्धारासारोनबाणपरंप
राकनकनिकषस्निग्धाविद्युत्प्रियानममोर्वशीत्यादि अथमरणं मरणंसुप्रसिद्धत्वादनर्थत्वाच्चनोच्यते वीरादावुच्यतेयद्वाशृंगारेप्यवसायिवा यथा सं
प्राप्तेवधिवासरेक्षणमनुत्वद्वर्त्मवातायनंवारंवारमुपेत्यनिष्क्रियतयानिश्चित्यकिंचिच्चिरं संप्रत्येवनिवेद्यकेलिकुररीःसास्रंसखिभ्यःशिशोर्माधव्याःसह
कारकेणकरुणःपाणिग्रहोनिर्मितः इत्यादिवच्छृंगाराश्रयालंबनत्वेनमरणव्यवसायमात्रमुपनिबंधनीयं अन्यत्रकामचारः यथा पश्यंतुभवंतस्ताट
का हृन्मर्मभेदिपतदुत्कटकंकपत्रसंवेगतत्क्षणकृतस्फुरदंगभंगा नासाकुटीरकुटीरकुहरद्वयतुल्यनिर्यदुद्बुदुद्बुदध्वनदसृक्प्रसरामृतेव

अथत्रासः गर्जितादेर्नःक्षोभस्त्रासोत्रोत्कंपनादयः यथा
त्रस्यन्तीचलशफरीत्यादि ८३

उत्साहेति कार्यारंभेषु संरंभः स्थेयानुत्साह उच्यते वीरः प्रतापविनयाध्यवसायसत्वमोहोविषादनयविस्मयविक्रमः उत्साहभूः स च दयारणदानयोगात्त्रे
धा किलात्र मतिगर्वधृतिप्रहर्षाः प्रतापविनयादिभिर्विभावितः करुणायुद्धदानाद्यैरनुभावितः गर्वधृतिहर्षामर्षस्मृतिमतिवितर्कप्रभृतिभिर्भावितः उ
त्साहः स्थायी स्वदते भावकमनो विस्तारानंदमयप्रभवत्येष वीरः दयावीरो नागानंदे जीमूतवाहनः युद्धवीरो यथा हत्वा नरीन्वीक्ष्य न संतुतोषयथा सतान्वी
क्ष्य पुरोनभस्यान् अमर्त्यभावेपि पुनर्ममैषाममृतपूर्वो भविता रणोग्रे दानवीरो यथा त्रिलोकीराज्यविभ्रंशचिंतामाच्छाद्य दानभूः उत्साहेवद्धे विक्षोः
शरीरेण समं वलेः प्रस्वेदरक्तनयनवदनादिक्रोधानुभावरहितो युद्धवीरोन्यथा रौद्रः विवेकसताभ्यां विशेषो वीररौद्रयोः शोकज इति इष्टनाशादि
भिश्चितो वैक्लव्यं शोकशब्दभाक् इष्टनाशादनिष्टाप्तेः शोकात्मा करुणोनुतं निश्वासोच्छ्वासरुदितस्तंभप्रलपितादयः स्वापापस्मारदैन्याधिमरणा

उत्साहजो भवेद्वीरस्त्रिधा धर्माजिदानतः श्लाघ्ये सर्वगुणैर्युक्तो नायकस्तत्र वर्ण्यते ॥ ८८ शोकजः करुणो ज्ञेयस्तत्राश्रुपातरोदने मोहवैवर्ण्य
निर्वेदप्रलापाश्च निवर्णयेत् ॥ हासजन्मा समाख्यातो हास्यनामा रसो बुधैः चेष्टांगवैषवैकृत्याद्यच्योहास्यस्य संभवः ८९ ॥ ॥ ॥ ॥ ॥

लस्यसंभ्रमाः विषादजननोन्मादचिंताद्याव्यभिचारिणः इष्टबंधुप्रभृतेर्विनाशात् अनिष्टस्य तु बंधनादेः प्राप्तेः शोकप्रकर्षजः करुणः इष्टनाशा
त्करुणो यथा मयि जीवितनाथ जीवसीत्यादि । अनिष्टावाप्तेः रत्नावल्यां सागरिकाबंधे हासजन्मेति व्यंगक्रीडादिभिश्चेतोविकासो हास उच्यते अंगवै
कृतिवाग्वेषैरात्मनोथ परस्य वा हासजन्मेति व्यंगक्रीडादिभिश्चेतोविकासो हास उच्यते विकृताकृतिवाग्वेषैरात्मनोथ परस्य वा हासः स्यात्परिपोषो
स्य हास्यस्त्रिप्रकृतिः स्मृतः आत्मस्थान्विकृतवेषभाषादीन्परस्थान्वा विभावानवलंबमानो हासस्तत्परिपोषान्माहास्यो व्यधिष्ठानत उत्तममध्यमाधमप्रकृ
तिः ~~स्मृतः आत्मस्थान्विकृतवेषभा~~ भेदात्षड्विधो भवति आत्मस्थो यथा जातं मे परुषेण भस्मरजसा यच्चंदनोद्धूलनं हारो वक्षसि यज्ञसूत्रमुचितं क्लि
ष्टा जटा कुंतला रुद्राक्षैः सकलैः सरत्नवलयं चित्रांशुकं वल्कलं सीतालोचनहारि कल्पितमहो रम्यं वपुः कामिनो परस्थो यथा खिन्नोसि मुंच शैलम्
मादि स्मितमिह विकासिनयनं किंचिल्लक्ष्यद्विजं हसितं मधुरस्वरं विहसितं सास्यशिरः कंपमुपहसितं अपहसितं सास्राक्षं विक्षिप्तांगं भवत्यतिहसि
तं द्वे द्वे हसिते चैषां ज्येष्ठे मध्ये धमे क्रमशः उत्तमस्य स्वपरविकारदर्शनात् तिमनहसितापहसिते मध्यमस्य अपहसितातिहसिते धमस्य व्यभिचारिणश्चास्य निद्रा

© Dharmartha Trust J&K. Digitized by eGangotri

विस्मयो ऽस्य इति विस्मयश्चित्तविस्तारो वस्तुमाहात्म्यदर्शनात् अतिलोकैः पदार्थैः स्याद्विस्मयात्माद्भुतो रसः कर्मास्य साधुवादाश्रुवेपथुस्वेदगद्गदाः हर्षावे
९३ गधृतिप्राया भवंति व्यभिचारिणः लोकसीमातिवृत्तपदार्थवर्णनादिविभावितः साधुवादाद्यनुभावपरिपुष्टो विस्मयस्थायिभावो हर्षवेगादिव्यभिचा
रिभावितो रसोऽद्भुतः यथा करान्नस्यापि न गिरिं निर्निमिषेक्षणाः अपश्यन्गोपिता दन्तदष्टजिह्वामुदान्विताः घोरेति रौद्रशक्त्या तु जनितं चित्तवैक्ल
व्यदं भयं विकृतस्वरसत्त्वादेर्भयभावो भयानकः सर्वांगवेपथुः स्वेदशोषवैवर्ण्यलक्षणाः दैन्यसंभ्रममोहादित्रासादिस्तस्य सोदरः रौद्रस्वरश्रवणा
द्रौद्रसत्त्वदर्शनाच्च भयस्थायिभावप्रभवो भयानको रसः तत्र सर्वांगवेपथुप्रभृतयो दैन्यादयश्च व्यभिचारिणः यथा ग्रीवाभंगाभिराममित्यादिश्
13 विस्मयोऽत्याद्भुतो ज्ञेयः स चासंभाव्यवस्तुनः ॥ दर्शनाच्छ्रवणाद्वापि देहिनामुपजायते ॥ ९२ ॥ नेत्रप्रकाशः पुलकः स्वेदो
निःस्पंदनेत्रता ॥ अनुभावा अद्भुतस्य वाणी स्याद्गद्गदा ९३ घोरवस्त्ववलोकेन भीतिजन्मा भयानकः वनितानीचबाले
षु वद्धुधा वर्ण्यतेऽमुं ९४ ॥ दिग्दर्शनं चापरस्य शोषो गद्गदवाणी श्रमसंभ्रमः कंपस्त्रासश्च वैवर्ण्यं संमोहाद्यत्र वर्ण्यते ॥ ९५
रौद्रः क्रोधात्मको ज्ञेयः कोपः परपराभवात् भीष्मक्रियो भवेदुग्रः सामर्षस्तत्र नायकः ९६ ॥ भुजाघातः स्वप्रशंसा शस्त्रो
त्क्षेपो थभ्रूकुटिः आक्षेपो दलनं शत्रोर्वर्ण्यंति [illegible] कवीश्वराः ॥ ९७ ॥ कुंतलायां रौद्र इति प्रतिकूलेषु तैक्ष्ण्यस्य प्रबोधः क्रोध उच्यते क्रोधो मत्सरवै
रिवैकृतमयैः पोषोऽस्य रौद्रो मुहुः क्षोभः स्वाधरदंशकंपभ्रुकुटिस्वेदास्यरागैर्युतः युद्धोत्साहविकस्यनांसधरणीघातप्रतिज्ञाग्रहैस्त्रामर्षमदो स्मृतिश्च
पलतासूयौग्र्यवेगादयः मात्सर्यविभावो रौद्रो यथा त्वं ब्रह्मवर्चसधरो यदि वर्तमानो यद्वा स्वजातिसमयेन धनुर्धरः स्याः उग्रेण भोस्तव तप रहामि
पक्षांतरस्य सहद्वां परशुः करोतु वैरिकृतादिविभावो यथा लाक्षागृहानलविषान्नसभाप्रवेशैः प्राणेषु वित्तनिचयेषु च नः प्रहृत्य आकृष्य पांड
ववधूपरिधानकेशान्स्वस्था भवंतु मयि जीवति धार्तराष्ट्राः इत्येवमादिविभावैः प्रस्विदनयनारुणताद्यनुभावैरमर्षादिव्यभिचारिभिः क्रोधपरिपोषो
रौद्रः परशुरामभीमसेनदुर्योधनादिव्यवहारेषु वीरचरितवेणीसंहारादावनुसंधेयः ९७

© Dharmartha Trust J&K. Digitized by eGangotri

गु

गुप्सेति जुगुप्सा गर्हणार्थो वा दोषमाहात्म्यदर्शनात् बीभत्सः कृमिपूतिगंधिकलिलप्रायैर्जुगुप्सैकमहोद्वेगी रुधिरांत्रकीकसवसामांसाद्यैरिभिः शोक १
१३ णः वैराग्याज्जघनस्तनादिषु घृणायुक्तो विभावैर्दृष्टो नासावक्रविकूणनादिभिरिहावेगार्तिशंकादय अत्यंतास्वाद्य कृमिपूतिगंधिप्रायविभावोद्भूतजु
गुप्सास्थायिभावपरिपोषलक्षणाउद्वेगी बीभत्सः यथा उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूच्छोफभूयांसि मांसान्यस्थिस्फिक्पृष्ठपिंडाद्यवयवसु
लभान्युग्रपूतीनि जग्ध्वा आर्तः पर्यस्तनेत्रः प्रकटितदशनः प्रेतरंकः करंकादंकस्थादस्थिसंस्थं स्थपुटगतमिव क्रव्यमव्यग्रमत्ति रुधिरांत्रकी
कसवसामांसादिविभावः क्षोभणो बीभत्सः यथा अंत्रप्रोतबृहत्कपालनलककूरक्वणत्कंकणप्रायप्रेंखितभूरिभूषणरवैराघोषयंत्यंबरं पीतच्छर्दि

जुगुप्सात्मा च बीभत्सः स्याद्दृग्भ्रूमुखनिकृणैः ॥ निष्ठीवनास्यभंगादि महतां नात्र वर्ण्यते ९८ सम्यग्ज्ञानसमुद्भूतः
शांतो निःस्पृहनायकः रागद्वेषपरित्यागात्सम्यग्ज्ञानसमुद्भवः ९९ ॥ स्निग्धात्तुष्टा तथादीनाकुष्टा हृष्टा भयान्वि
ता जुगुप्सिता विस्मिता चेत्यष्टौ तेऽतिरसदृष्टयः १०० जगति यद्यपि संति परःशता गुरुतमा रचना बुधवुद्धये ननु तथा
पि मया न वृथा कृता गुरुतमा रचना बुधबुद्धये गुरुपादांबुजद्वन्द्वप्रसादाद्वासमन्मतिः त्रिपाठी शिवरामाख्यो हारं
हरितवाननमुं २ ॥ इति त्रिपाठिशिवरामकृतः रसरत्नहारः समाप्तः ॥ नरककर्दमद्यनप्राग्भारघोरोल्लसद्यालोलस्तनभारबंधुरवपूर्विहा
रं धावति रम्यपिरमणोजघनस्तनादिषु वैराग्यात् घृणायुक्तो बीभत्सो यथा लालांवक्त्रासवं वेत्ति मांसवैं वेत्ति मांसपिंडोपयोधरौ मांसास्थिकूटं ज
घनं जनः कामग्रहातुरः न चायं शांत एव विरक्तो येतो बीभत्समानो निरज्यते सम्यगिति उद्वाग्महालंकाररीत्या काव्यप्रकाशे तु निर्वेदस्थायिभा
वोऽस्ति शांतोऽपि नवमो रसः शृंगारकेतु रत्युत्साहजुगुप्साः क्रोधो हासः स्मयो भयं शोकः शमममपि केचित्स्राहुः पुष्टिर्नाट्येषु नैतस्येति अत एवो
क्तं मल्लकामदूति कश्चित्संदंभोदंभोलिसदृशं वक्ति चेद्भव तथापि नेति विकृतिं शांतः सागरधीरधीः जगतीति शतान्यपरे परःशताः परःशता यास्तेये
लेषां परास्संख्या शतादिकादिकाद्विस्मरः ननु इति वाक्यालंकारे गुरुतमा रचना बुधवुद्धये बालबोधाय इति श्रीशिवरामत्रिपाठिकृतो लक्ष्मीविहा

रसरत्नहार ३९

© Dharmartha Trust J&K. Digitized by eGangotri

१५

अमरतन्नकोश

५००

© Dharmartha Trust J&K. Digitized by eGangotri